# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 4 (2)** | गुणाः –70 |
| विषयः – साहित्यम् (ध्वनिवर्गः) | **कोड –C.C.5.3.9 (2)** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – व्यक्तिविवेक-विमर्शः (प्रथमोविमर्शः) | |

### प्रथमान्वितिः (Unit 1) — गुणाः

**प्रश्न १ कस्यचिदेकस्य ससन्दर्भ व्याख्यां कुरुत।** ५

१ सहसा यशोऽभिसर्तुं समुद्यतादुष्टदर्पणा मम धीः।
स्वालङ्कारविकल्पप्रकल्पने वेत्ति कथमिवावद्यम् ॥

२ उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम्।
ममकत्वान्न तत् तस्य युक्तमव्यभिचारतः ॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ ग्रन्थकारस्य परिचयं यच्छत।

२ 'ध्वनिलक्षणम्' ग्रन्थानुसारं वर्णयत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ एकस्यैव ससन्दर्भ व्याख्यां लिखत।** ५

१ अन्यस्य तूपसर्जनीभावाव्यभिचार एव तस्य तदर्थमुपादानतः, यो हि यदर्थमुपादीयते, नासौ तमेवोपसर्जनीकरोतीति युक्तं वक्तुम्। यथोदकाधुप्रादानार्थमुपात्तो घटादिस्तदेवोदकादि।

२ सर्व एव हि शाब्दो व्यवहारः साध्यसाधनभावगर्भतयाप्रायेणानुमानरूपोऽभ्युपगन्तव्यः तस्य परप्रवृत्तिनिवृत्तिनिबन्धनत्वात् तयोश्च सम्प्रत्ययासम्प्रतुययात्मनोरन्यथाकर्तुमशक्यत्वतः।

**प्रश्न ४ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** १०

१ सत्वप्रधानानि नामानि, बहुप्रकारकाणि सम्भवन्ति। ग्रन्थाधारेण सम्यग् विवेचयत ।

२ घटनादिक्रिया एव अन्वय व्यतिरेकाभ्यां कथं? महिमभट्टदिशा निरूपयत ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्यचिदेकस्य व्याख्या कार्या ।** ५

१ वाक्यार्थस्तु वाच्यस्यार्थस्यांशपरिकल्पनायामंशानां विध्यनुवादभावेनावस्थितेर्विधेयांशस्य सिद्धासिद्धतयोपपदनानपेक्षसापेक्षत्वेन द्विविधो बोद्धव्यः ।

२ यथा च वाक्यार्थविषये साध्यसाधनभावे साध्यसाधनप्रतीत्योः सुलक्षः क्रमभावः तथा वस्तुमात्रादावनुमेयविषयेऽप्यवगन्तव्यः ।

**प्रश्न ६ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** १०

१ विभावादिवाक्यार्थसमकालमेव इत्यादीनां भावानां प्रतीतिरूपजायमाना सर्वैरेवावधार्यते। ग्रन्थदिशां वर्णयत ।

२ साध्यसाधनभावगर्भ इत्युच्यते, स्पष्टं कारयत ।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** ५

१ वाच्यार्थस्य स्वरूपं दर्शयत ।

२ विभावानुभावव्यभिचारिण एव रसा, ग्रन्थदिशा विवेचयत ।

**प्रश्न ८ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** १०

१ काव्यस्यात्मा ध्वनिरिति, व्यक्तिविवेकानुसारं दर्शयत ।

२ यद्यर्थ इति वाच्योऽर्थोऽभिमतोऽव्याप्तिरेव सा ।
यनैवंवादिनीत्यादावर्थस्यार्थान्तराद्गतिः ॥
महिमभट्टदिशां निरूपयत ।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत ।** १०

१ ग्रन्थस्य रचयिता कोऽस्ति ?

२ प्रथमे विमर्शे को विषयः प्रतिपादितोऽस्ति ?

३ काव्ये वैशिष्ट्यं किमधीनम् ?

४ अर्थ: केन सम्बन्धः ?

५ ध्वनिः काव्यस्य आत्मा इति को वदति ?

६ पदार्थस्य कति भेदाः ?

७ ग्रन्थाकारः कतिविधं प्रमाणं स्वीकरोति?

८ किं मूलकं ध्वनिसिद्धान्तं प्रतिपादयति ध्वनिकारः?

९ व्यक्तिविवेककृद् दिशा कियन्ति प्रमाणानि?

१० विवेकस्य कोऽर्थः?

११ जातिः किम्?

१२ महिमभट्ट रसानुभवं किं रूपं निर्धारयति?

१३ रसास्वादने कारणानि कानि भवन्ति?

१४ रसादयः किं रूपाः?

१५ स्वः प्रकाशः किम्?